"अकर्त्तरि च कारके" पा० । कर्त्तृभिन्ने, क्रियाशून्ये च "पुरुषोऽकर्त्ता भोक्ता" चेति सांख्यमतम् ।

**अकर्म्मक** त्रि० नास्ति कर्म्म यस्य ब० कप् । व्याकरणोक्ते कर्म्मशून्ये धातौ, "लः कर्म्मणि च भावे चाकर्म्मकेभ्य इति" पा० । "फलव्यापारयोरेकनिष्ठतायामकर्म्मक इति" हरिः । स्त्रियां टापि कापि अतइत्त्वम् अकर्म्मिका । "प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रियेति" हरिः ।

**अकर्म्मण्य** त्रि० न कर्म्मणे प्रभवति कर्म्मन्+यत् न०त० । कर्म्मानर्हे "अकर्म्मण्य' तिथिमलं विद्यादेकादशीं विनेति" ति०त० ।

**अकर्म्मन्** अनुपलम्भादिवत् अर्थाभावे न० त० । कर्म्माभावे "कर्म्मणोह्यपि बोद्धव्यं बोध्यव्यञ्च विकर्म्मणः । अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणोगतिरिति" गीता अकर्म्मणः अक्रियाया इति तद्भाष्यम् । दुष्टं कर्म्म अप्राशस्त्ये न० त० । दुष्टकार्य्ये अकर्म्मादावभिरत इति स्मृतिः । न०ब० । कार्य्यशून्ये त्रि० "अकर्म्मा दस्युरभित" इति वेदः ।

**अकल** पु० नास्ति कलाऽवयवोऽस्य । निरंशे परमात्मनि "चिन्मयस्याद्वितीयस्य निष्कलस्ये"त्युक्तेस्तस्य तथात्वम् । गीतादिकलाशून्ये, अवयवशून्ये च त्रि० ।

**अकल्कन** त्रि० कल्कनं दम्भः न०ब० । दम्भरहिते "अकल्कनो निरारम्भः" इति गीता । वैद्यकोक्तौषधपाकविशेषः कल्कनं, तच्छून्ये च । नास्ति कल्कोऽस्य ब०कप् । अकल्ककोऽप्यत्र । अत एव गीतायामकल्कक इत्यपि क्वचित् पाठः ।

**अकल्का** स्त्री० न कल्कः मलोयस्य न० ब० । निर्म्मलत्वेन शुभ्रायां ज्योत्स्नायाम् । मलादिशून्ये त्रि० ।

**अकल्य** त्रि० कलासु साधुः कला+यत् कल्यः निरामयः न० त० । अस्वास्थ्यवति । कल्यते इति कल-यत् कल्यं कल्पनीयं मिथ्याभूतं न० त० । सत्ये "अपि त्वनीनयदपनीताशेषशल्यमकल्यसन्ध इति दशकु० । अकल्यसन्धः सत्यसन्ध इत्यर्थः ।

**अकवा** त्रि० न कव्यते वर्ण्यते कव-आ न०त० । अवर्णनीये "प्र प्रजायन्ते अकवा महोभिरिति" वेदः ।

**अकस्मात्** अव्य० न कस्मात् किञ्चित्कारणाधीनत्वं यत्र अलुक् स० । कारणानधीने अतर्कितोपनते । "कथमयमकस्माद्गगनचारिणामाकाशे करुणध्वनिः श्रूयते" इति नाटकम् "सामान्यलक्षणा कस्मादकस्मात् परिलुप्यते" इति पक्षधरः । "अकस्मात् नगरोपान्ते कथं धूमायते चितेति" हास्या० । पा० चार्वादिगणे तथा पाठाच्च न पञ्चम्या लुक् तेन आपतितभवाद्यर्थे ठञि टिलोपे आकस्मिक इति ।

**अकाण्ड** त्रि० न०त० । अनवसरे अनुचितकाले "तातस्तमकाण्डे एव प्राणहरप्रतीकारमुपप्लवमिति" काद० । अस्य नि० एतदन्तत्वमिति केचित् । ब० । स्कन्धशून्ये वृक्षे पु० ।

**अकाम** त्रि० न कामयते काम-णिङ्-अच् । इच्छाशून्ये "नाकामो दातुमर्हतीति" स्मृतिः । कामनाविषयफलाननुसन्धायिनि । "अकामो विष्णुकामोवेति" स्मृतिः स्मरविकारशून्ये च । "भयादकामाऽपि हि दृष्टिविभ्रममिति" शकु० ।

**अकामतस्** अ० अकाम+पञ्चम्यास्तसिल् । अनिच्छात इत्यर्थे "अकामतः कामचारे चौरवद्दण्डमर्हतीति" स्मृतिः ।

**अकाय** पु० नास्ति कायोऽस्य । कायशून्ये राहौ तस्य चामृताहरणकाले विष्णुना च्छिन्नमस्तकत्वेऽपि अमृतप्राशनेन अमरणमित्यनुसन्धेयम् । "अमृतास्वादनविशेषाच्छिन्नमपि शिरः किलासुरस्येदम् । प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके इति" वृहत्स० । देहशून्ये त्रि० । परमात्मनि पु० । निष्कलस्याशरीरिणइत्युक्तेस्तस्य तथात्वम् ।

**अकार** पु० अ+स्वरूपार्थे कार । अस्वरूपे वर्णे एवमिकारादयोऽपि तत्तद्वर्णस्वरूपेषु । कारः करणं न० ब० । क्रियारहिते त्रि० ।

**अकारण** त्रि० नास्ति कारणं हेतुरुद्देश्यं वा यस्य । हेतुरहिते उद्देश्यरहिते च "किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते" इति कुमा० "ततोऽकारणवैरी नः "कारणादपरे परे इति" नैषधम् । निष्प्रयोजने च । न० त० । कारणभिन्ने "अकारणगुणोत्पन्ना" इति भाषा० ।

**अकारिन्** त्रि०कृ-णिनि न०त० । कर्त्तृभिन्ने, करणान्निवृत्ते च ।

**अकार्पण्य** त्रि० नास्ति कार्पण्यं यस्य । दैन्यशून्ये, कृपणताशून्ये च ।

**अकार्य्य** न० अप्रशस्तं कार्य्यम् अप्राशस्त्ये न० त० । कुत्सितकार्य्ये निषिद्धकार्य्ये च । "अकार्य्यमिव पश्यामि स्वमांसमिव भोजने" । "किमकार्य्यं कदर्य्याणामिति" हितो० । कर्त्तव्यभिन्ने त्रि० ।

**अकाल** पु० अप्राशस्त्ये न०त० । अप्रशस्तकाले विहितकर्म्मसु पर्य्युदस्तयाऽभिहिते गुरुशुक्राद्यस्तकालादौ, स च मलमास, गुरुशुक्रबाल्यवृद्धत्वास्तमय, सिंहमकरान्यतरगुरुस्थिति, पूर्व्वराश्यनागतातिचारिगुरुकवत्सर, पूर्व्वराशिसंक्रमिष्यमाणातिचारिगुरुकपक्षत्रय, वक्रगुरुकाष्टाविंशतिदिवस, भूमिकम्पाद्यद्भुतसप्ताह, सिंहादित्य, गुर्व्वादित्य, पौषमासचतुष्टयान्य—